International Journal of Sanskrit Research 2024; 10(4): 21-25

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2024; 10(4): 21-25
© 2024 IJSR
www.anantaajournal.com
Received: 21-05-2024
Accepted: 24-06-2024

**Dr. Pritiranjan Majhi**
Assistant Professor, PG
Deptartment of Sanskrit, FM
University, Odisha, India

# वैशेषिकदर्शने योगतत्त्वानुशीलनम्

**Dr. Pritiranjan Majhi**

**DOI:** https://doi.org/10.22271/23947519.2024.v10.i4a.2413

## सारांश
दर्शनं चेतनानां जीवनतत्त्वं विश्लेषयति, आकलयति, व्यवस्थापयति इत्यतः दर्शनमेव आत्मविज्ञानम् इत्यस्मिन् नास्ति अत्युक्तिः। एकमेव विश्वमाधारीकृत्य विश्वानि दर्शनानि अस्तित्वमागतानि। संसारस्योपरि विचारमनपेक्ष्य भारतीयदर्शनेषु मुख्यो भेदः वेदमाश्रित्यैव। वेदस्य प्रमाणस्वीकुर्वतामास्तिकेति संज्ञा, अस्वीकुर्वतान्तु नास्तिकेति। आस्तिकपक्षे तु भेदो नैकः। आस्तिकसम्प्रदायाः मुख्यतः षट्सु विभक्ताः न्यायादिभेदात्। तेष्वपि स्वातन्त्र्यमावहति योगदर्शनम्। षट्सु आस्तिकसंप्रदायेषु योगसंप्रदायस्य विचाराः सांख्यदर्शनस्य विचारेभ्यो नातिभिद्यन्ते। अतः सांख्यदर्शनेन सह योगदर्शनस्य सादृश्यं सुखानुमेयम्। किन्तु सांख्येतरदर्शनेष्वपि योगस्य विचाराः अविरुद्धाः इति कौतुहलस्य विषयः। इतोऽपि विस्मयावहं योगदर्शनस्य सर्वसम्प्रदायग्राह्युत्वम्। द्वैत-अद्वैतनिर्विशेषेन सर्वे दार्शनिकाः योगस्य गुरुत्वं स्वीकुर्वन्त्येव। मनः एव जीवं मोक्षाभिमुखिनं करोति प्रतिपथि गमयति च। अतः सर्वेषु सम्प्रदायेषु मनसः स्थैर्य विधातुं योगस्य तात्त्विकोल्लेखः सुलभ्यः। प्रस्तावितेऽस्मिन् लघुप्रबन्धे वैशेषिकदर्शने योगस्य प्रभावः कीदृशः, कथं च दर्शनेऽस्मिन् योगतत्त्वानि प्रतिपादितानि तद्विषये चिन्ता प्रस्तूयते ।

**कूटशब्द** : दर्शनम्, योग, वैशेषिकः, मोक्षः, निग्रहः, मनः, आत्मन्, ज्ञानम्, चरकः।

## प्रस्तावना
मनुष्याः सर्वदा इष्ट-सुखप्राप्तये अनिष्ट-दुःखपरिहारार्थं च प्रयतन्ते। लौकिकोपायाः तादृशस्य इष्टस्य साधनेन नार्हन्तीति विद्वन्द्भिः सिद्धैश्च स्वस्वोपलब्ध्यनुसारं भिन्नानि तत्त्वाति भिन्ना उपायाश्च प्रवर्त्तिताः। तस्मादेव दर्शनशास्त्राणामुद्भवः। विशेषस्य भेदस्य बोधकशास्त्रं विशेष पदार्थमधिकृत्य कृतं शास्त्रं वा वैशेषिकमिति ख्यातम्। महर्षिकणादेन रचिततया वैशेषिकदर्शनं काणाददर्शनम् औलोक्यदर्शनं चेत्यभिधीयते। वैशेषिकदर्शनस्यास्यारम्भः धर्मव्याख्यानस्य प्रतिज्ञया भवति। तस्मादाद्यमेव सूत्रितम् - अथातो धर्म व्याख्यास्यामः[1] इति । धर्मेति शब्दः भिन्नैराचार्यैः भिन्नतया एव व्याख्यातः। स्मृतौ कथितमस्ति-

**धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।**
**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्।।[2] इति।**

---

[1] वैशेषिकसूत्रम् १.१.१

[2] मनुस्मृतिः ६.९२

**Corresponding Author:**
**Dr. Pritiranjan Majhi**
Assistant Professor, PG
Deptartment of Sanskrit, FM
University, Odisha, India

अर्थात् धर्म धृत्यादिदशलक्षणात्मकम्। वैशेषिकसूत्रेऽस्मिन् मनुनिर्दिष्टाः दशगुणाः नाभिप्रेताः किन्तु द्रव्यादयः षट्पदार्था एव सूत्रिताः। किं च वैशेषिकानुगामिनः भाष्यकाराश्च धर्मेति कणादानुमोदितं शिष्टाचारं सदाचारं वा प्रख्यापयन्ति। यद्वा भवतु जागतिकतत्त्वानां स्वरूपनिर्धारणपूर्वकं तेषां विवेचनेन निःश्रेयसाधिगम इति तत्र एव कणादाचार्यस्य प्रतिज्ञा स्थिता। आचार्येण एव स्पष्टीकृतम् - यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः[3]।

### योगस्य मोक्षानुकूलता

मोक्षः योगसाध्यः । योगात् ज्ञानमुत्पद्यते तस्मान्मुक्तिश्च सम्भवति। अतः योगः मोक्षानुकुलः । याज्ञवल्क्यस्मृतौ आचार्येण उच्यते - अयं तु परमो धर्म यद् योगेनात्मदर्शनम्[4]। सर्वेषां प्राणीजातानाम् आत्मदर्शनमेव परमो धर्म, तत्तु योगेन साध्यते इति योगः धर्मसाधकः इत्यर्थः ।

युजिर् योगे, युज् समाधौ युज् संयमने च इति त्रिषु धातुषु योगशब्दः निष्पद्यते इति बहुभिर्बहुधा शब्दोऽयं प्रयुज्यते । यथोक्तम्-

**संयोगस्त्वात्ममनसोर्योग इत्युच्यते बुद्धैः ।**
**प्राणापानसमायोगो योग इत्यपि कैश्चन ।।**
**विषयेन्द्रियसंयोगो योग इत्यपि पण्डितैः ।**
**विषयासक्तचित्तानां ज्ञानं मोक्षश्च दूरतः ।।**[5]

बहुप्राचीनकालादेव भारतीयमनीषिभिः योगतत्त्वमधिकृत्य सुस्थिरा परम्परा रक्षिता। पातञ्जलशास्त्रे मनसः एकाग्रता, मनोवृत्तीनां निरोधो योग उच्यते। यथोक्तं **योगश्चित्तवृत्तिनिरोधः**[6] इति। विशेषं ज्ञानं प्राप्तुं धारणाय च मनसः स्थैर्यमावश्यकम्। कठोपनिषद्युपदिश्यते-

**नाविरतो दुश्चरितान्नाशान्तो नासमाहितः ।**
**नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात् ।।**[7]

अर्थात् पापकर्मेभ्यः ये न विरताः ये च असंयतेन्द्रियाः, येषां मनः असमाहितः ते परमज्ञानलाभाय अनुपयुक्ताः । योग एव चित्तं ज्ञानप्राप्त्यनुकुलतया प्रस्तौति, अतः सर्वस्मिन्नेव दर्शने योगः प्रसङ्गक्रमेण निःश्रेयससाधनत्वेन व्याख्यातः ।

### योगपरिचिति

शाश्वतमिदं वेदान्तवचनम् –

**मन एव मनुष्याणां कारणं बन्धमोक्षयोः।**
**बन्धाय विषयासक्तं मुक्त्यैर्निर्विषयं स्मृतम्॥**[8]

सत्त्वरजस्तमसां प्रभावेण प्रकाशशीलत्वं प्रवृत्तिशीलत्वं स्थितिशीलत्वं च मनसः स्वभावम्। त्रिगुणात्मकं चित्तः गुणविकारात् असमाहितम् अस्थिरं वर्तते। योगमाध्यमेन साधकः पापवहायाः चित्तनद्याः स्रोतं खिलीकृत्य आत्मानं निःश्रेयसाभिमुखि करोति। व्यासभाष्यकारेण सुस्पष्टमुक्तं-

**प्रख्यारूपं हि चित्तसत्त्वं रजस्तमोभ्यां संसृष्टमैश्वर्यप्रियं भवति**[9]**।**

अर्थात् चित्तस्य सत्त्वं प्रख्यारूपं विशुद्धज्ञानरूपम्। किन्तु रजस्तमोभ्यां संसर्गेण विषयाभिमुखि सांसारिकभोगान् प्रति गच्छति।

अनुभूयमाणाः सुखदुःखादयः मनसः चाञ्चल्यकारणम्। मोक्षसाधनार्थं मनस अविचलितावस्था एव काम्या। तदर्थं च मनसि प्रवृत्तीनां रोध आवश्यकः। वैशेषिकाचार्येण स्वीकृतम् आत्मेन्द्रियमनोऽर्थसन्निकर्षात् सुखदुःखे उत्पद्यतः। यदि अर्थेन इन्द्रियस्य इन्द्रियेण मनसः तथा मनसा आत्मनः सन्निकर्षः न स्यात्तर्हि सुखादीनामप्युत्पत्तिर्न स्यात्। अणुपरिमाणात्मकं मनः ज्ञानकारणत्वेन आत्मेन्द्रिययोः सहायतया सुखदुःखाद्युपलाब्धिं कारयति। यथाम्नातम् - **आत्मेन्द्रियमनोऽर्थसन्निकर्षात् सुखदुःखे**[10] इति। न केवलं सुखदुःखयोः अधिकन्तु इच्छाज्ञानप्रयत्नादीनामपि आरम्भे आत्ममनसोः मनेन्द्रिययोः विषययोः च संयोगः कारणम्। तेनोत्पन्नाः सुखादयो मुमुक्षुपुरुषस्य नाभिलषिताः किन्तु एतेषाम् अनारम्भे प्राप्यः मोक्ष एव तस्येष्टः ।

चरकसंहितायां शरीरस्थानस्य योगसूत्रभाष्यविवरणस्य च उद्धरणानाञ्च प्रयोगेन अत्र वैशेषिकसूत्रस्य सूत्रद्वयस्य, यत्र योगः विवक्षितः, अर्थस्य स्पष्टीकरणस्य प्रयासः क्रियते। चरकसंहितायामुक्तमस्ति-

**आत्मेन्द्रियमनोऽर्थानां सन्निकर्षात्प्रवर्तते।**
**सुखदुःखमनारम्भादात्मस्थे मनसि स्थिरे।।**
**निवर्तते तदुभयं वशित्वं चोपजायते।**
**सशरीरस्य योगज्ञास्तं योगमृषयो विदुः।।**[11]

---

[3] वै.सू १.१.२

[4] याज्ञवल्क्यस्मृतिः १.८

[5] स्कन्दपुराणम् ४.४१.४८-४९

[6] योगसूत्रम् १.२

[7] कठोपनिषद् १.२.२४

[8] अमृतबिन्दूपनिषद्,६/३४

[9] व्यासभाष्यम्, यो. सु. १.२

[10] वैशेषिकसूत्रम् ६.२.१५

[11] चरक. शा.१/१३८-१३९

अस्यांशस्य व्याख्यायां श्रीगङ्गाधराचार्येण भणितम् यत्- सर्वासां सुखदुःखात्मिकानां वेदनानामशेषतोऽवर्त्तनं निवृत्तिः योगे भवति मोक्षे च भवति। कः पुनर्मोक्षो योगश्चेत्यत आह-- मोक्षो निवृत्तिनिःशेषेति । निःशेषा निवृत्तिः सुखदुःखात्मिकाया वेदनाया मोक्षस्तस्य मोक्षस्य प्रवर्तको योग इति।

आत्मादिसन्निकर्षात् सुखं प्रवर्त्तते दुःखश्च। सम्यक् सन्निकर्षात् सुखमसम्यक्सन्निकर्षात् दुःखं प्रवर्तते । तत्रात्मस्थे स्थिरे मनसि सत्यनारम्भावाचा शरीरेण मनसा च प्रवृत्तेरभावात्

तदुभयं सुखश्च दुःखश्च निवर्त्तते योगसिद्धस्य सशरीरस्य जीववतः पुरुषस्य वशित्वञ्चोपजायते। वशी हि स यश्चेतः समाधत्ते यश्च सर्वं निरस्यति, न तु स वशी यः कर्म कृत्वा तत्फलं स्वयं भुङ्क्ते । तं योगज्ञ ऋषयो योगं विदुरिति किंवा, इन्द्रियाण्यपि प्राधान्यख्यापनार्थं पृथग् वेदनाश्रयत्वेन सेन्द्रियग्रहणेनोच्यन्ते। वेदनायां देहेन्द्रियगतत्वं तदाधारत्वेन प्रतीयमानत्वात् ज्ञेयम्। शरीरगता केशादयो न वेदनाधारा इत्यनुभव एव प्रमाणम् । या तु मूत्रपुरीषगत वेदना ग्रहणीमूत्रकृच्छ्रादौ वक्तव्या, सा मूत्रपुरीषाधारशरीरप्रदेशस्यैव बोध्या इत्याचार्याः।

**वैशेषिकसूत्रे योगः**

वैशेषिकसूत्रे योगस्य लक्षणनिर्णायकं सूत्रं पञ्चमाध्याये द्वितीयाह्निकस्य षोडशतमसूत्रत्वेन निगदितम्। केषाञ्चिन्मतेन सूत्रमिदं प्रक्षिप्तम्, अतः कैश्चित् भाष्यकारैः व्याख्याकारैश्च इदं नानुमोदितम्। प्राचीनानां ग्रन्थानां मूलपाठः प्राचीनानां ग्रन्थानां मूलपाठः प्राचीनभाष्याणामनुशीलनेन निश्चीयते। यथा पाणिनीयकाशिकयोः भेदसत्त्वेऽपि महाभाष्यस्य अनुसरणेन मूलपाणिनीयं स्पष्टं भवति। यदि काणादसूत्राणां काऽपि प्राचीनव्याख्या स्यात् तर्हि परिलक्षिताः पदभेदाः शब्दभेदाः श्च परीक्षिताः स्युः। किन्तु तादृशी काऽपि व्याख्या न प्राप्यते।

वैशेषिकाचार्येषु प्रशस्तपादाचार्यस्य भाष्यं सर्वाधिकमादृतं विद्वद्भिः। किन्तु वैशेषिकसूत्रस्य भाष्यमिदं सूत्रानुसारेण नानुबद्धम्। नापि तत्र योगविषयकं किमपि आलोचनं कृतमस्ति। अतः तदनुशीलनेनापि मूलसूत्रोद्धारो न सम्भवति। सम्भवतः प्रशस्तपादाचार्यस्योत्तरवर्तिनि काले सूत्रमिदं संयोजितम्। प्रशस्तपादभाष्यात् पूर्वम् अन्यं किमपि भाष्यमासीदिति किरणावली-न्यायकन्दल्यादिभिः ज्ञायते। किरणावलीष्स्करटीकायां टीकाकारेण पद्मनाभाचार्येणतद् भाष्यं रावणभाष्यमिति अभिहितम्। रत्नप्रभादावापि रावणभाष्यं प्रचर्चितम्। किन्तु तस्य मूलग्रन्थः अद्यापि नोपलब्धः। शङ्करमिश्रेण स्वरचिते वैशेषिकसूत्रोपस्कार-वृत्तौ स्थाने स्थाने वृत्तिकृतस्तु इति वचनेन भारद्वाजवृत्तिः नाम प्राचीनव्याख्या सङ्केतिता किन्तु तस्यापि मूलमद्यापि नाधिगतम् ।

वैशेषिकसूत्रस्य प्राचीनत्वहेतोः भिन्नेषु प्रतिलिपिषु सूत्रमिदं भिन्न भिन्नतया प्राप्यते। कुत्रचित् सूत्रभेदः दृश्यते कुत्रचिच्च नोपलभ्यते सूत्रमिदम्। यथा चन्द्रानन्दवृत्तौ पदविभागात् सूत्रमपि विभक्तं दृश्यते । तदनारम्भः इति सूत्रांशः पूर्वसूत्रस्य अन्तिमे प्राप्यते। तद्यथा-

**आत्मेन्द्रियमनोर्थसन्निकर्षात् सुखदुःखे तदनारम्भः । ९**
**आत्मस्थे मनसि शरीरस्य सुखदुःखाभावः स योगः । १०**

तथा हि मिथिलापीठप्राध्यापकेन श्रीमदनलालदेवशर्मणा १९५७ एशवीयाब्दे अविज्ञातकर्तृकप्राचीनव्याख्यया समलंकृतं वैशेषिकदर्शनं प्रकाशितं यत्र सूत्रमिदं त्रिषु सूत्रेषु विभक्तम्-

तदनारम्भश्चात्मस्थमनसि, २. सशरीरस्य सुखदुःखाभावः, ३. संयोगः ११ चेति।

किन्तु अन्यस्मिन् तदनारम्भः इति पदं योगलक्षणनिर्णायकसूत्रस्य आदौ प्राप्यते। तद्यथा-

**तदनारम्भ आत्मस्थे मनसि शरीरस्य दुःखाभावः स योगः** ।[12] इति ।

आरम्भेति क्रियाशीलत्वम्, अनारम्भो नाम निष्क्रियता, अविकृतावस्था अनुत्पत्तिर्वा। मनः साहाय्येण इन्द्रियैः स्वीकृतो विषयः यदा आत्मना संबध्यते तदा अनुभूयते. यदि मनसा इन्द्रियात्मनोः संबन्धः अवरुध्यते तदा आत्मनि न कश्चित् विषयो भासते। तस्यामवस्थायां सुखदुःखादयोऽपि नानुभूयन्ते। मनसः येन विषयेण सह सन्निकर्षः घटते आत्मनि तदेव प्रकाशते। यदि मनः वाह्यविषयं विहाय केवलम् आत्मना सह युक्तं भवति तर्हि बाह्यानुभवानाम् अनारम्भः भवति ।

**वृत्तिहीनं मनः कृत्वा क्षेत्रज्ञे परमात्मनि।**
**एकीकृत्य विमुच्यते योगयुक्तः स उच्यते ।।**[13]

सूत्रे तद् इत्यनेन मनोविकाराः मानसिकवृत्तयः सन्निकर्षाः निर्दिष्टाः। तदनारम्भ इति मनसः कर्म- अनारम्भ इत्यर्थः । अथवा तदिति पदेन सुखदुः खे अभिधीयेते। यदा आत्मनि मनः स्थिरीभवति तदा आत्मीभूते मनसि मानसिकवृत्तयः नोत्पद्यन्ते। तथा आत्मा स्वाधिष्ठाने अधिष्ठितः स्वभावत एव निष्क्रिय उदासीनश्च तिष्ठति। सांसारिकभोगेभ्यः विरक्तः

---

12 वैशेषिकसूत्रम् ५.२.१६

13 स्कन्दपुराणम् ४.४१.४१

पुरुषः विषयाणाम् असारत्वं बन्धनकारणत्वं च ज्ञात्वा आत्माभिमुखी भूत्वा मिथ्याभिमानं च त्यक्त्वा परमप्रशान्तये प्रयतते ।
शरीरस्येति शरीरावच्छिन्नस्य आत्मनः । भोगेच्छायाः अभावे वासनाशून्यमनसि विकारो न जायते। तदा संपूर्णतया आत्मस्थं मनः विषयहीनं स्थिरं च भवति। तस्यामवस्थायाम् आत्मायतने शरीरे अपि दुःखाभावः भवति। यद्यपि योगी शरीरधर्मान् न त्यजति अन्नं खादति च कण्टकादिभिः संबध्यते तथापि तस्य सुखदुःखे नोत्पद्यतः । एतादृशी अवस्था एव योग उच्यते। स्थितिरियं परमप्रशान्तये अनुकूला। दुःखसम्मिश्रितसुखस्यापि दुःखात्मकतया विवेकिना तदनारम्भोऽपि करणीयः । अतः चन्द्रानन्दवृत्तौ सुखदुःखाभावः इत्यपि पाठः। उच्यते वृत्तिकारेण-

**यदा हि आत्मनि मनोवस्थितं नेन्द्रियेषु तदा चतुष्टयसन्निकर्षस्यानरम्भात् तत्कार्ययोः सुखदुःखयोरभावरूपो विद्यमानशरीरस्यात्मनो वायुनिग्रहापेक्ष आत्मनोः मनसा संयोगो योगः**[14]।

सुषुप्तिदशामन्तरेण मनः कदापि निर्विषयं भवितुं नार्हति। असमाहिते चित्ते हिंसादिप्रवृत्तिवशात् पापवृत्तयः प्रादुर्भवन्ति। तमोवाहुल्येन च निद्रातन्द्रादिभिः आयत्तं स्रक्चन्दनवनितादिविषयभोगप्रियम् अधोगतिं प्राप्नोति। दयाक्षामादिशीलानामभावात् ईर्षाक्रोधमत्सरादियुक्तं चित्तम् अशान्तिं भजते। अतः मनसि यावत् वृत्तीनां निरोधो न भवति तावत् योगः न साध्यते। यथा वायुना संस्पृष्टं जलं क्षणमात्रमपि स्थिरं न तिष्ठति तथैव विषयभोगाकांक्षिणि मनसि योगः असाध्यः। उच्यते दक्षस्मृतौ-

**न स्थिरं क्षणमप्येकमुदकं हि यथोर्मिभिः ।**
**वाताहतं तथा चित्तं तस्मात्तस्य न विश्वसेत् ।।**[15]

वलवन्मनसः निग्रहः मुनिभिरपि सुदुष्करः। संसारिणां कृते तु ततोऽधिकं कष्टसाध्यः। मनसः सविषयत्वे तस्य निरोधाभावात् योगः कथं स्यादिति उत्तरति आत्मस्थे मनसि इति। सांसारिकविषयेषुदुः खमनुभूय तेभ्यो विरक्तः सन् यदा अलमिति बुद्धिरुदेति तदा बाह्येन्द्रियेभ्यो विरतम् आत्मस्थं मनः आत्ममात्रं विषयीकृत्य तिष्ठति। तदा आत्मनि मनोक्रियानुकुलक्रियाभावात् मनः अपि स्थिरं भवति। शङ्करमिश्रेण वैशेषिकसूत्रोपस्कारे व्याख्यातं-

**विषयेष्वलम्प्रत्ययवतः उदासीनस्य बहिरिन्द्रियेभ्यो व्यावृत्तं मनो यदात्मस्थामात्मनिष्ठ भवति तदा तत्कर्मानुगुणप्रयत्नाभावात् कर्म मनसि नोत्पद्यते स्थिरतरं मनो भवति स एव योगः, चित्तनिरोधलक्षणत्वात् योगस्य ।**

मनसि यावत् वृत्तिनां निरोधो न भवति तावत् योगो न साध्यते। सर्वदा विषयभोगे लिप्तः क्वचित् मनोनिग्रहे प्रवर्तते । उपदिष्टमस्ति –

**यतो निर्विषयस्यास्य मनसो मुक्तिरिष्यते।**
**अतो निर्विषयं नित्यं मनः कार्यं मुमुक्षुणा ।।**[16]

किन्तु तन्निग्रहः दुष्करः अपि नासम्भवः। यदि कोऽपि दृढसंकल्पः सन् ऐहिकानां सुखभोगानाम् असारत्त्वं विवेच्य निग्रहे यतते तर्हि अवश्यमेव साफल्यमधिगच्छति। सूत्रमस्मिन् **अभ्यासवैराग्याभ्यां तन्निरोधः**[17] । गीतायामपि अभ्यासेन वैराग्येण च चित्तस्थैर्यं साधयेदिति उपदिष्टम्-

**असंशयं महावाहो मनो दुर्निग्रहं चलम्**
**अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ।।**[18]

वैराग्याद्बहिर्वृत्तीनां निरोधः अभ्यासादात्मनि निरन्तरमवस्थानं सम्भवतः । वारम्वारं अभ्यासेन तत्त्वानां विवेचनेनैव योगः साधितो भवति । साधूक्तं –

**समितिरसकृत् कार्या वार्या न गोपनता स्थितिः**
**दृढतरमनोवीर्यं कार्यं विचार्य सहस्रशः ।**
**नियतिवशतः कायोत्सर्गेऽप्ययं हतिमाप्नुयाद्,**
**नजतु यदिवा मन्योः पक्षो रसातलमञ्जसा॥**[19]

आचार्यश्रीविजयामृतसूरिप्रणीता सरणीटीकानुसारं कामक्रोधादिभिः सह युद्धं भूयोभूयः विधेयं किन्तु गोपनतास्थितिः स्वसंयमरक्षणविधिः न वार्या न त्याज्या स्वत्रतरक्षणं सर्वथा विधेयमेव। नियतिवशतः देहपरित्यागेऽपि कायोत्सर्गो यदि भवेत्स विधेयः परन्तु कामादेर्वशो न भवेदित्यर्थः ।
यमनियमप्राणायामप्रत्याहारध्यानधारणासमाधिप्रकर्षजन्य एव आत्ममनसोः संयोगः। स तु प्रयत्नसाध्यः । अतः एतेषां

14 चन्द्रानन्दवृत्तिः
15 दक्षस्मृतिः ८.२१
16 ब्रह्मबिन्दूपनिषत् ३
17 योगसूत्रम् १.१२
18 भगवद्गीता ६.३५
19 सप्तसन्धानकाव्यम् ५.५२

योगाङ्गानाम् अनुष्ठानं कर्तव्यम्। ससंकल्पकः निष्ठया व्योगाङ्गानामनुष्ठानेन योगाभ्यासे रतः भवेत्। उपदिष्टमस्ति-

**अतोऽनिलं निरून्धीत चित्तस्य स्थैर्य्यहेतवे ।**
**मरुन्निरोधनर्थाय षडङ्ग योगमभ्यसेत् ।।**[20]

अभ्यासः समयसाध्यः अतः वारं वारम् अभ्यासेन तत्त्वानां विवेचनेनैव योगः साधितः भवति।

**अभियोगात्सदाभ्यासात्तत्रैव च विनिश्चयात् ।**
**पुनः पुनरनिर्वेदात्सिश्येद्योगो न चान्यथा ।।**[21]

तस्मादेव निःश्रेयसप्रापम् आत्मसाक्षात्कारजनकधर्म जायते, तथा शनैः शनैः चित्तस्य अशुद्धता दूरीभूय विवेकख्यातिर्मुक्तिर्वा संजायते।

**उपसंहृतिः**

दर्शनमिति पदं दृशिधातोः करणे ल्युटि मननार्थकत्वेन निष्पन्नम्। विचारात्मकं शास्त्रालोचनं दार्शनिकसम्प्रदायानां क्षेत्रम् । संसारमधिकृत्य, सांसारिकमाधारीकृत्य, अधिकन्तु संसारस्य संसरणमधिकृत्य विस्तृतमालोचनं वास्तविकतत्त्वस्य असंसारिणः परमतत्त्वस्य ज्ञानाय अनुकूलमिति मत्या केचित्सम्प्रदायाः प्रवृत्ताः, इतरे तु केचित् इतोऽपि परं निःश्रेयसमवाप्तुम् अधिगन्तुमिच्छुकाः परमतत्त्वाभिमुखिनः सन्ति । यद्वाभवतु दर्शनं महत्तरं किञ्चिदभिलक्ष्यैव स्थितम् ।

विद्यासु दर्शनविद्यायाः प्राधान्यम् **अध्यात्मविद्या विद्यानाम्** इति गीतावचनात् स्पष्टीयते। तासु पुनः योगस्य स्थानं महदिति प्रसङ्गे महाभारतस्य उक्तिः प्रणिधानयोग्या - **न तु योगमृते प्राप्तुं शत्या सा परमागतिः** । परमागतिरित्युक्ते निःश्रेयस् इति मोक्षपर्यायः। भारतीयदर्शनसंप्रदायानां प्रवृत्तिः मोक्षमभिप्रेत्यैव दृश्यते। किन्तु सूक्ष्मपर्यालोचनेन ज्ञातुं शक्यते यत् मोक्षस्य स्वरूपं सर्वत्र नाभिन्नम्। अतः स्वस्वानुमतं श्रेयः प्रापयितुं सम्प्रदायेषु भिन्नाः मार्गाः प्रकल्पिताः । तत्त्वदृष्ट्या दार्शनिकानाम् एषा विविधता ज्ञानस्य बहूपायसाध्यत्वं प्रज्ञापयति ।

काणाददर्शनम् औलूक्यदर्शनं काश्यपीयदर्शनम् इत्येतानि वैशेषिकदर्शनस्य नामान्तराणि। दर्शनस्यास्य आदिप्रणेता कणादाख्यः दार्शनिकाचार्यः । आचार्यस्यास्य नामानि पितृप्रदत्तानि इति न प्रतीयन्ते। तस्य आचाराणि स्वभावश्च अस्य नियामकत्वेन अनुमीयन्ते। कणं तण्डुलं भक्षयित्वा एव एषः जीवधारणमकरोदिति प्रवादोऽस्ति । एवं च श्रुयते कणादाचार्यः दिवाकाले गहने अरण्ये ध्यानरतः स्थित्वा दिवावसारे बहिरागत्य भक्ष्यमन्विष्य

जीवं धारयति स्म। अतः तस्य नाम उल्लूकः इति पपात। महाभारते अस्योल्लेखः दृश्यते **उल्लूकः परमो विप्रो मार्कण्डेयो महामुनिः ।।**[22]

केचिदाचार्याः [23] कणादाचार्यस्य नामान्तरं योगी इति अप्यासीदिति कथयन्ति । कणभक्षणं दिवानिर्वासनादिकं योगिसु एव दृश्यते तितिक्षाविषयीभूतम् । यतः कथितमस्ति- **शीतोष्णादिद्वन्द्वसहनं तितिक्षा।** प्रशस्तपादभाष्यकारेण स्वभाष्यादौ कथ्यते –

**योगाचारविभूत्या यस्तोषयित्वा महेश्वरम्**
**चक्रे वैशेषिकं शास्त्रं तस्मै कणभूजे नमः ।।**

एतेन स्पष्टं प्रतीयते यत् वैशेषिकदर्शनस्य आदिकर्ता योगाचारी आसीदिति शम्।

**परामृष्टाः ग्रन्था**


1. Aranya Hariharananda, Patanjala Yogadarshan, Lukhnow: Lukhnow University. Printed
2. Bandopadhyay. Kanakaprabha, Sankhya Patanjala Darshan, Kolkata: Sahitya Sanstha; c1961, Printed.
3. Chatterji, Mohinimohana, Indian Spirituality, London: J.M Dent & Sons Ltd; c1907, Printed
4. Dasgupta. Surendranath, Yoga as Philosophy and Religion, London: Teubner & Co.; c1924, Printed.
5. Nyayakandali. Ed. J.S. Jetly. Varodara: Oriental Institute; c1991, Printed.
6. Paribrajaka. Satyapati, Yogadarshan, Gujrat. Darsan Yoga Mahavidyalaya. 2003. Printed
7. Prasastapada Bhashyam, Ed. Kalipada Tarkacharya, Calcutta: The Sanskrit Sahitya Parisad. Printed
8. Sastri Dharmendranath, Bharatiya Darsan Shastra, Varanasi: MLBD; c1953.
9. Sharma. Rammurty, Bharatiya Darsan ki Chintan Dhara, Delhi: Manidwipa; c2001, Printed.
10. Slokavartikabyakhya Tatparyatika, Ed. Kunjunni Raja, Madras: University of Madras; c1971. Printed.
11. Sukla. Dinanath, Bharatiya Darshan Paribhasa Kosh, Delhi: Pratibha Prakasan; c1993, Printed.
12. Swami Prabhavananda, The Spiritual Heritage of India, New York: Vedanta Press; c1963, Printed.
13. Vaisesika Darsan of Kanada, Ed. Anantalal Thakur, Darbhanga: Mithila Institute; c1957. Printed
14. Vaisesika Sutropaskara, Ed. Dhundiraj Sastri, Varanasi: Chowkhamba Sanskrit Sansthan; c1969, Printed.
15. Yoga Darsan, Ed. Rajaram, Lahore: Sahitya Prcharak Mandal; c1922. Printed.


20 स्कन्दपुराणम् ४.४१.५८

21 तत्रैव १.४१.४५

22 महा, शान्ति, ११

23 वैशेषिकदर्शनम्, प्रद्योतकुमार मण्डल, पृ १